कोविदः

अभ्यासः – वर्गः २७

अव्ययीभावः - उत्तराणि

I समस्तपदं विलिख्य समासं निर्दिशत -

१) नगरस्य समीपम् - उपनगरम् - समीपार्थकः

२) अर्थस्य योग्यम् - अन्वर्थम् - योग्यतार्थकः

३) शत्रुं शत्रुं प्रति - प्रतिशत्रु - वीप्सार्थकः

४) देव्याः पश्चात् - अनुदेवि - पश्चादर्थकः

५) आज्ञाम् अनतिक्रम्य - यथाज्ञम् - अनतिक्रमार्थकः

६) देशे इति - अधिदेशम् - सप्तम्यर्थकः/आधारार्थकः

७) गिरेः समीपम् - उपगिरि - समीपार्थकः

८) आमयानाम् अभावः - निरामयम् - अभावार्थकः

९) वने वने - प्रतिवनम् - वीप्सार्थकः

१०) गुरोः पश्चात् - अनुगुरु - पश्चादर्थकः

II. विग्रहवाक्यं विलिख्य समासनाम निर्दिशत

१) यथास्थानम् - स्थानम् अनतिक्रम्य - अनतिक्रमार्थकः

२) अन्वग्रजम् - अग्रजस्य पश्चात् - पश्चादर्थकः

३) प्रत्येकम् - एकम् एकं प्रति - वीप्सार्थकः

४) उपाग्नि - अग्नेः समीपम् - समीपार्थकः

५) अधिभूतम् - भूते इति - सप्तम्यर्थकः/आधारार्थकः

६) निर्वैरम् - वैराणाम् अभावः - अभावार्थकः

७) अनुरूपम् - रूपस्य योग्यम् - योग्यतार्थकः

८) अधिमनसम् - मनसि इति – सप्तम्यर्थकः/आधारार्थकः

९) यथाविधि - विधिम् अनतिक्रम्य - अनतिक्रमार्थकः

१०) उपवनम् - वनस्य समीपम् - समीपार्थकः